# गीतायाः भाषा संस्कृतं पठ्यताम्

SPF

प्रकाशनविभागः

अस्मिन् पाठ्यक्रमे गीतायां प्रयुक्तायाः संस्कृतभाषायाः पाठनं क्रियते । गीतायां प्रमुखतया ***समासस्य, सन्धेः, लोट्लकारस्य, लट्लकारस्य, प्रत्ययानाम् अव्ययानां*** च बाहुल्येन प्रयोगः दृश्यते । अस्मिन् पाठ्यक्रमे प्रमुखतया चत्वारः भागाः सन्ति ।

- अत्र प्रथमे भागे संस्कृतसम्भाषणाय आवश्यकबिन्दूनां द्वारा गीतायाः शब्दानां परिचयः, गीतायां प्रयुक्ता कारकविभक्तिः, प्रयुक्ताः उपसर्गाः, प्रयुक्तानि अव्ययानि, प्रयुक्तानि क्रियापदानि, प्रयुक्ताः लट्-लोट्-लङ्-लृट्लकाराः, आत्मनेपदीनि परस्मैपदीनि च रूपाणि इत्यादीनां परिचयः कारितः अस्ति । अर्थात् गीतायां निर्दिष्टपात्राणां द्वारा कथं सम्भाषणं करणीयम् इत्यादिकं प्रदर्शितम् अस्ति ।
- द्वितीये भागे उपपद-विभक्तीनां परिचयः, हलन्तशब्दाः, विशेषणविशेष्यपरिचयः, विधिलिङ्लकारः, कर्मणिप्रयोगः, भावेप्रयोगः, प्रत्ययाः इत्यादयः विषयाः प्रदर्शिताः सन्ति । एतेषाम् उपस्थापनाय महाभारतात् गीतायाः च विषयाः पदानि च स्वीकृतानि सन्ति । अत्र विभिन्नाः सम्भाषणात्मकाः पाठाः सन्ति ।
- तृतीये भागे संस्कृतव्याकरणस्य मुख्यानि तत्त्वानि प्रदर्शितानि सन्ति । यथा – सन्धिः, समासः, कारकम्, कृदन्तम्, तद्धितम् इत्यादीनि ।

  - समासप्रकारेषु अपि ***तत्पुरुषस्य बहुव्रीहेः द्वन्द्वस्य*** च अधिकतया प्रयोगः दृश्यते । यथा –

***मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।***
***सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते ॥१८.२६॥***

**समस्तपदानि -** मुक्तसङ्गः, अनहंवादी, धृत्युत्साहसमन्वितः, सिद्ध्यसिद्ध्योः, निर्विकारः

- सन्धिप्रकारेषु अपि आधिक्येन स्वरसन्धिषु **सवर्णदीर्घसन्धेः यण्सन्धेः गुणसन्धेः वृद्धिसन्धेः पूर्वरूपसन्धेः च**, व्यञ्जनसन्धिषु **जश्त्वसन्धेः श्चुत्वसन्धेः ष्टुत्वसन्धेः** च, **विसर्गसन्धेः** च बाहुल्येन प्रयोगः दृश्यते । यथा –

***कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।***
***सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः ॥१८.९॥***

- लोट्लकारस्य लट्लकारस्य लृट्लकारस्य च प्रयोगः तु गीतायाम् विशेषतया प्राप्यते । यथा –

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं *योगमा**तिष्ठोत्तिष्ठ*** भारत ॥४.४२॥

देवान् ***भावयतानेन*** ते देवा ***भावयन्तु*** वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥३.११॥

यच्छ्रेयः स्यान्निश्चितं ***ब्रूहि*** तन्मे
शिष्यस्तेऽहं ***शाधि*** मां त्वां प्रपन्नम् ॥२.७॥

प्रत्ययेषु अपि अधिकतया कृत्प्रत्ययानां प्रयोगः गीतायाम् अस्ति । तत्रापि **क्त-क्त्वा-ल्यप्-शतृ**-आदीनां प्रत्ययानां प्रयोगाधिक्यम् अस्ति । यथा – उपाश्रिताः (क्त), पूताः (क्त), आगताः (क्त), प्रोक्तः (क्त) त्यक्त्वा (क्त्वा), ज्ञात्वा (क्त्वा), अवाप्य (ल्यप्) अवेक्ष्य (ल्यप्) विहाय (ल्यप्) भावयन्तः (शतृ), सत् (शतृ)

अवधातव्यं यत् एतेषां बोधनाय आधिक्येन गीतायाः शब्दाः स्वीकृताः सन्ति । गीतायां कीदृशस्य सन्धेः प्रयोगः अस्ति । कीदृशस्य समासस्य प्रयोगः अस्ति इत्येवम् अन्विष्य पाठे प्रदर्शितम् अस्ति । येन गीतायाः पठनम् कालक्रमेण सरलं भविष्यति । एतानि पुस्तकानि पठित्वा कोऽपि साक्षात् अन्येषाम् गीतासम्बन्धग्रन्थानाम् अध्ययनम् अनुवादं विना कर्तुं शक्ष्यति ।

- चतुर्थे भागे तु साक्षात् श्रीमद्भगवद्गीतायाः अष्टादश अध्यायाः स्वीकृताः सन्ति । अत्र सप्तशतं श्लोकाः सन्ति । अस्य चतुर्थस्य भागस्य भागचतुष्टयं कृतम् अस्ति । अत्र प्रत्येकं श्लोकस्य पदच्छेदः, अन्वयः, पदार्थः, पदपरिचयः, व्याकरणं, भावस्पष्टीकरणं तात्पर्यं च प्रदत्तम् अस्ति । व्याकरणांशे प्रत्येकं श्लोके विद्यमानानां सन्धिसमासादीनां परिचयः प्रदत्तः अस्ति ।

इत्थं गीतायां प्रयुक्तायाः भाषायाः आधारेण संस्कृतभाषाज्ञानवर्धनाय कौशलविकासाय च अत्रत्याः पाठाः सज्जीकृताः सन्ति । अस्मिन् पाठ्यक्रमे प्रत्येकं पाठ्यबिन्दोः उपस्थापनाय अभ्यासाय च गीतायां महाभारते वा उपलब्धानि वाक्यानि अधिकतया स्वीकृतानि सन्ति । अस्मिन् पाठ्यक्रमे नामाङ्कनं कर्तुम् अत्र नुदतु www.learnsamskrit.online

योगेश्वरः श्रीकृष्णः सर्वान् अर्जुनम् इव अनुगृह्णातु इति आशास्य विरम्यते । शुभं भवतु ।